# .. bhAtu bhAratam ..

# ॥ भातु भारतम् ॥

## Document Information

Text title : bhAtubhAratam

File name : bhAtubhAratam.itx

Location : doc_z_misc_general

Author : vaidyaH rAmasvarUpa shAstrI

Language : Sanskrit

Subject : philosophy

Transliterated by : Srinivas Kommireddy srinivas.kommireddy at googlemail.com

Proofread by : Srinivas Kommireddy

Source : Divya Jyoti Sanskrit Magazine September 1966

Latest update : December 6, 2015

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ भातु भारतम् ॥

मुनिभिरर्चितं देवपूजितं श्रुतिभिरूर्जितं शास्त्रचर्चितम् ।
प्रकृतिभूषितं ज्ञानसुन्दरं धरणिगौरवं भातु भारतम् ॥ १॥

सुरसरित्तटं सिन्धुशोभितं रुचिरपर्वतं कान्तकाननम् ।
कृषकसङ्कुलं सस्यश्यामलं विपुलगोव्रजं भातु भारतम् ॥ २॥

विविधबोधदैः सूरिभिश्रितं विमलबुद्धिभिर्ज्ञानिभिर्युतम् ।
विततकीर्तिभिः कोविदैः स्तुतं करुणमानसं भातु भारतम् ॥ ३॥

हरिनिषेवितं रामपावितं मुरघरक्षितं व्यासवर्णितम् ।
त्रिदशगोगुरुर्ब्राह्मणप्रियं रचितराष्ट्रकं भातु भारतम् ॥ ४॥

विदितसंस्कृतं ख्यातकौशलं विभवमण्डितं त्यागपण्डितम् ।
प्रयतमानुषं स्वर्णभूतलं सकलसुन्दरं भातु भारतम् ॥ ५॥

निहितपाकिकं चीनजित्वरं निरतरूसकं स्वस्य रक्षकम् ।
विपुलसम्पदं धर्मतत्परं प्रथितविक्रमं भातु भारतम् ॥ ६॥

सरलसूनृतं ग्राम्यजीवनं परमभावुकं भव्यमन्दिरम् ।
अनघकेतुकं स्वीयशासनं भुवनवन्दितं भातु भारतम् ॥ ७॥

— वैद्यः रामस्वरूप शास्त्री

Encoded and proofread by Srinivas Kommireddy
srinivas.kommireddy at googlemail.com

.. bhAtu bhAratam ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*